# अभ्यासप्रश्नपत्रम् 2021-22

## द्वितीयं सत्रम् – परामर्शात्मकः उत्तरसङ्केतः

## कक्षा- नवमी

## संस्कृतम्

**समयः होराद्वयम्** **सम्पूर्णाङ्काः- 40**

**अवधातव्यम् –**

1. अङ्कयोजनायां प्रदत्तानि उत्तराणि निदर्शात्मकानि सन्ति। प्रदत्तानि उत्तराणि अतिरिच्यापि सन्दर्भानुसारम् अन्यानि उत्तराणि भवितुम् अर्हन्ति।
2. **आन्तरिकविकल्पात्मकेषु प्रश्नेषु यद्यपि स्पष्टतया निर्देशः दत्तः अस्ति यत् केवलं प्रश्नद्वयम् अथवा प्रश्नत्रयम् इत्यादिकम् उत्तरं दातव्यं तथापि यदि छात्रः सर्वेषां प्रश्नानाम् उत्तराणि लिखति तर्हि छात्रहिताय मूल्याङ्कनं करणीयम्।** यथा चित्रवर्णने पञ्चवाक्यानां लेखनम् अभीष्टं परं छात्रः यदि सप्तवाक्यानि लिखति तर्हि तत्र केवलं प्रथम-पञ्चवाक्यानां न अपितु यानि वाक्यानि उत्तमानि सन्ति तेषां मूल्याङ्कनं करणीयम्।
3. अनुच्छेदे श्लोके नाट्यांशे वा आधारिताः प्रश्नाः अवबोधात्मकाः सन्ति। अतः विद्यार्थिनः एतेषु प्रदत्तशब्दानां स्थाने समभाव-पर्यायवाचि-शब्दानां प्रयोगं कर्तुं शक्नुवन्ति। तदर्थम् अङ्काः देयाः। यदि विद्यार्थिनः उत्तरलेखन-समये समुचितानां विभक्तीनां वचनानां च प्रयोगं न कुर्वन्ति तर्हि अंशतः अङ्काः कर्तनीयाः न तु सम्पूर्णाङ्काः।
4. त्रुटिपूर्णवर्तन्यै व्याकरणात्मक-प्रयोगाय च अनुपाततः अङ्काः कर्तनीयाः न तु सम्पूर्णाङ्काः।
5. आंशिक-दृष्ट्या समुचितेभ्यः उत्तरेभ्यः अपि अङ्काः देयाः।
6. रचनात्मक-कार्ये वाक्यरचना प्रमुखा न तु वाक्यसौन्दर्य-तत्त्वम्। अतः आंशिकवाक्यशुद्धये अपि अङ्काः देयाः।

| | **वर्णनात्मकाः प्रश्नाः** | **40 अङ्काः** |
|---|---|---|
| | अपठितावबोधनम् | |
| **1.** | अपठित–गद्यांशः<br>(अ) **एकपदेन लिखत–** **(केवलं प्रश्नद्वयम्)**<br>i. पराधीनतायाः<br>ii. वीराः | 10<br>**1x2=2** |

| | | |
|---|---|---|
| | iii. अनेकानाम्<br><br>**(आ) पूर्णवाक्येन लिखत– (केवलं प्रश्नद्वयम्)**<br>i. भारतस्य स्वाधीनतायाः आन्दोलने सर्वे आबालवृद्धाः सक्रियाः आसन्।<br>ii. मातृभूम्याः स्वाधीनतायाः कृते तेषां समेषां वीराणां बलिदानं वयं सर्वदा स्मरिष्यामः।<br>iii. अस्माकं भारतवर्षः बहुकालपर्यन्तं पराधीनतायाः श्रृङ्खलासु बद्धः आसीत्।<br><br>**(इ) अस्य अनुच्छेदस्य कृते उचितं शीर्षकं संस्कृतेन लिखत–**<br>स्वाधीनतासंग्रामः/ अथवा अन्यत् किमपि अनुच्छेदाधारितम्<br>**(ई) यथानिर्देशम् उत्तरत– (केवलं प्रश्नत्रयम्)**<br>i. जानीमः<br>ii. वीराः<br>iii. सक्रियाः<br>iv. समेषां | **2x2=4**<br><br>**1**<br><br>**1x3=3** |
| | **रचनात्मकं कार्यम्** | 15 अङ्काः |
| 2. | पत्रलेखनम्<br><br>i. प्रणमामि<br>ii. तत्रास्तु<br>iii. कोरोनाटीकाकरणशिविरस्य<br>iv. बालकानां<br>v. संयोजिका<br>vi. महत्त्वं<br>vii. छात्राः<br>viii. दृष्ट्वा<br>ix. निवेदनीयाः<br>x. दीपकः | ½X10=5 |
| | | |
| 3. | चित्रवर्णनम्– | 1x5=5 |

| | | |
|---|---|---|
| | अत्र छात्रेभ्यः संक्षिप्तवाक्यरचना अपेक्षिता वर्तते। केवलं वाक्यशुद्धिः द्रष्टव्या। अस्य प्रश्नस्य प्रमुखम् उद्देश्यं वाक्यरचना अस्ति। वाक्यं दीर्घम् अस्ति अथवा लघु इति महत्वपूर्णं नास्ति। प्रतिवाक्यम् अर्धः अङ्कः च व्याकरणदृष्ट्या शुद्धतानिमित्तं निर्धारितः अस्ति। मञ्जूषायां प्रदत्ताः शब्दाः सहायतार्थं सन्ति। छात्रः तेषां वाक्येषु प्रयोगं कुर्यादेव इति अनिवार्यं नास्ति। छात्रः स्वमेधया अपि वाक्यानि निर्मातुं शक्नोति। मञ्जूषायां प्रदत्तानां शब्दानां विभक्तिं परिवर्तनं कृत्वा अपि वाक्यनिर्माणं कर्तुं शक्यते।<br>अथवा<br><br>**अनुच्छेदलेखनम्**<br>अयं चित्रवर्णनस्य विकल्पः अस्ति। छात्राः मञ्जूषायां प्रदत्तानां शब्दानां विभक्तिं परिवर्तनं कृत्वा अपि वाक्यनिर्माणं कर्तुं शक्नुवन्ति। अतः अङ्काः देयाः। अस्य मूल्याङ्कनाय अन्ये नियमाः चित्रवर्णनस्य अनुगुणं पालनीयाः॥ | |
| | | |
| **4.** | **अनुवादः–**<br>i. इदं मम गृहम् अस्ति।<br>ii. इदम् रितेशस्य पुस्तकम् अस्ति।<br>iii. सीमा गीतं गायति।<br>iv. अहं पुस्तकम् अपठम्।<br>v. बीना श्वः गृहं गमिष्यति।<br>vi. संस्कृतं सर्वासां भाषाणां जननी अस्ति। | 1x5=5 |
| | **पठितावबोधनम्** | **15** |
| **5.** | **पठित–गद्यांशः**<br>**(अ) एकपदेन लिखत– (केवलं प्रश्नद्वयम्)**<br>i. प्रकृतिः<br>ii. मातृगर्भे<br>iii. मानवः<br>**(आ) पूर्णवाक्येन लिखत– (केवलं प्रश्नद्वयम्)**<br>i. पृथिवी, जलं, तेजः, वायुः, आकाशः, च अस्याः प्रमुखानि तत्वानि। | **3**<br><br>**½ x2=1**<br><br><br>**1x2=2** |

| | | |
|---|---|---|
| | ii. परिष्कृतं प्रदूषणरहितं च पर्यावरणम् अस्मभ्यं सांसारिकं जीवनसुखं, सद्विचारं सत्यसङ्कल्पं माङ्गलिकसामग्रीञ्च प्रददाति।<br>iii. आव्रियते परितः समन्तात् लोकः अनेन इति पर्यावरणम्। | |
| | | |
| 6. | **पद्यांशः–**<br><br>**(अ) एकपदेन लिखत– (केवलं प्रश्नद्वयम्)**<br>i. जटायुः<br>ii. रावणम्<br>iii. वैदेहीम्<br>**(आ) पूर्णवाक्येन लिखत– (केवलं प्रश्नद्वयम्)**<br>i. जटायुः अवसुप्तः तं शब्दं शुश्रुवे।<br>ii. जटायुः रावणं क्षिप्रं निरीक्षितवान्।<br>iii. जटायुः वैदेहीं ददर्श॥ | **3**<br>½ x2=1<br><br><br><br>1x2=2 |
| 7. | **नाट्यांशः–**<br><br>**(अ) एकपदेन लिखत– (केवलं प्रश्नद्वयम्)**<br>i. मूर्खाणाम्<br>ii. मूढः<br>iii. शिलानाम्<br>**(आ) पूर्णवाक्येन लिखत– (केवलं प्रश्नद्वयम्)**<br>i. भो महाशय! किमिदं विधीयते? अलमलं तव श्रमेण।<br>ii. मकरालये शिलाभिः रामः सेतुं बबन्ध।<br>iii. स्वसंकल्पदृढतया युक्तः पुरुषः सिकताभिरेव सेतुं करिष्यति॥ | **3**<br>½ x2=1<br><br><br><br>1x2=2 |
| 8. | **अन्वयः –**<br>i. विना<br>ii. तपोभिः<br>iii. वशे<br>iv. सेतुः | ½ x4=2 |

| | | |
|---|---|---|
| | भावार्थे रिक्तस्थानपूर्तिः–<br>अथवा<br>i. वृद्धः<br>ii. युवा<br>iii. वैदेहीं<br>iv. कुशली | |
| 9. | कथाक्रमानुसार–लेखनम्–<br>i. श्रान्तः कश्चन बालः पाठशालागमनवेलायां क्रीडितुम् अगच्छत्।<br>ii. तेन सह केलिभिः कालं क्षेप्तुं तदा कोऽपि न वयस्येषु उपलभ्यमान आसीत्।<br>iii. तन्द्रालुः बालः लज्जया तेषां दृष्टिपथमपि परिहरन् एकाकी किमपि उद्यानं प्राविशत्।<br>iv. अथ सः पुष्पोद्यानं व्रजन्तं मधुकरं दृष्ट्वा तं क्रीडितुं द्वित्रिवारं आह्वयत्।<br>v. तथापि, सः मधुकरः अस्य बालस्य आह्वानं तिरस्कृतवान्।<br>vi. ततो भूयोभूयः हठमाचरति बाले सः मधुकरः अगायत्।<br>vii. वयं हि मधुसंग्रहव्यग्रा इति।<br>viii. तदा सः बालः अलं भाषणेन अनेन मिथ्यागर्वितेन कीटेन इति विचिन्त्य अन्यत्र गतः। | ½ x8=4 |